This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2280 विषय वैदिक

नाव दर्शपूर्णमासविधी MSS.

लेखक / लिपीकार —

पृठ 27 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विघ्नेनपरिसमाप्तेयंयष्ट्या[illegible]र्थस्मृतिरेवकर्तृ॥गमनायमंगलआनंतर्येचान
यतःकुतश्चिदनुपयोगात्॥किंतुवेदाध्ययनापेक्षयातस्यात्रापेक्षितत्वात्॥अतआरं
भेस्वर्थस्तस्यैववेदाध्ययनस्यवेदार्थविचारप्रतिहेतुतामाह॥अधिक्रियतेऽस्मिन्नधिकारः॥
स्वास्यंफलंभोक्तृनपाकर्मणिलक्ष्यंमिष्यर्थः॥तेनायमर्थः॥अथवेदाध्ययनानंतरंयतो ८-४
धीतोवेदः॥अतोऽतोऽधिकारोवक्ष्यतेऽभिधास्यतेविचारएवंनिरूपिष्यतइत्यर्थः॥
अधिकारलक्षणंसर्वेषांवेदवाक्यप्रतिपाद्यानामर्थानामुपलक्षणार्थं॥अधिकारादि
नःसर्वोपिवेदवाक्यार्थोभिधास्यतइत्यर्थः॥प्रतिज्ञासूत्रमिदं॥प्रतिज्ञायतइदमधिकारो
वक्ष्यतइतिप्रतिज्ञाकरणंचक्षिप्यबुद्धेरव्याकुलार्थं॥अन्यथाहिकिमिदमुच्यतइतिबुद्धेर्व्या
कुलाभवंति॥केचित्त्वेवंव्याचक्षते॥अयमध्याय[illegible]शुसूत्रकर्तानित्यकाम्यप्रायश्चित्तो
पदेशानंतरंउपनिबद्धः॥तेनाऽनेनसर्वेकर्मोपबंधानांतर्यं॥अतःशब्दस्तुहेत्वर्थएव॥
यतोदर्शपूर्णमासादीनिप्रवर्ग्यांतानिकर्माण्युक्तानिअतस्तेष्वेवकर्मस्वधिकारउच्यते॥
एषुपुरुषोनेषुकर्मसुअस्याधिकारःअस्यस्वामित्वंअस्यकर्मजन्यफलभोक्तृत्वमितिवक्ष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदर्थः॥यत्तुनेतेषुचकर्मसुएवमपेक्षाजायते॥एतेषुनित्येतराधिकर्मसु स्याप्यधिकारइति॥
अतएवप्रतिज्ञा॥अथसर्वकर्मोपबंधनानंतरं॥यतःकर्माण्युक्तानिअतस्तेष्वप्यधिकारोमि
धीयतइत्यधिकारेचशास्त्रंनेतिप्रतिज्ञानं॥कर्मजन्यफलभोक्तृत्वंचाधिकारइत्युक्तं॥तथ
कर्मणांसफलत्वेसिद्धेसत्तिसिध्यतिनान्यथा॥तेनतत्साधनार्थमिदंसूत्रंप्रोच्यते॥नत्रैवंसं
देहः॥किमफलवंतिकर्माणिउतफलवंतीति॥अफलवंतीतिब्रूमः॥कुतः॥कर्मसमू
नंरप्रसक्षेणफलस्यानुपलब्धेः॥ननुमाभूत्प्रत्यक्षंकर्मणांफलवत्वेप्रमाणं॥आगमस्तुमे
भविष्यतीति॥वक्ष्यामो॥अग्निहोत्रंजुहुयात्स्वर्गकामः॥दर्शपूर्णमासाभ्यांस्वर्गकामोयजे
तेत्यादिरयंभविष्यति॥नथाप्यत्रैतर्हिचारार्हं॥अत्राग्निहोत्रादिषुकिंपुरुषस्याधिकारः॥स्वा
म्यंकर्मजन्यफलभोक्तृत्वमस्तिनवेति॥तदर्थमिदंविचार्यते॥यजेतजुहुयादित्यत्रयेयंप्रत्ययो
याख्याभावनानस्यानिर्धार्यैवंरूपाशब्दःप्रधानेनांगंकुर्यान्नहोमंकुर्यादित्येवंस्वर्गेनुत
साधनतयागुणभूतेनास्वर्गेणयागंचहोमंकुर्यादितितुकाम्यमानत्वेनोपात्तःस्वर्ग
दिरेवभाव्यस्तत्रचसाधनंभावार्थइतियागेनहोमेनस्वर्गंकुर्यादितितत्रोपेत्यनहिश्रा

॥२॥

॥भा०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यते॥ योऽग्निष्टुयायाः स्वर्गकामादेश्यपुरुषस्यक्रियाकर्तृरूपःसंबंधःतत्रक्रियाप्रधानभू
तपुरुषोगुणभूतः॥ अथवापुरुषःप्रधानभूतःक्रियागुणभूतेति॥ यदिगुणभूतःपुरुषस्तस्य
गुणभावक्रियाक्षेपादेवसिद्धमनुद्य स्वर्गादिद्रव्यंसाधनंविधीयते॥ कामश्रुतिश्चसाधन
कामनानुवादःअयमर्थः॥ स्वर्गंसाधनत्वेनकामयमानोयजेतस्वर्गेणयागंनुयीप्सितार्थः॥
अथवासमुद्रमनसाध्यायन्नरथंतरंगायेदितिस्वर्गेकामनैवगुणभूतकर्तृविशेषणंसतीया
यांगत्वेनविधीयते॥ यदिद्रव्यवाचीनतः कर्मप्रधानद्रव्यंगुणभूतं॥ अथसुरवाचीगतदायागो
गुणभूतस्वर्गप्रधानमिति॥ इतिद्वेधाएवंपक्षः॥ अथवाप्रधानभूतःपुरुषःतत्तस्यास्या
र्थंस्वर्गादिगोचराप्रवृत्तिःप्रसयेनविधीयतेसाध्यंतयावयागउपदिश्यते॥ स्वर्गकामोयागे
नतुर्यादीप्सितार्थंप्रवृत्तिमिति॥ स्वर्गकामस्यचार्थाप्रवृत्तिःस्वर्गविषयैवेतिन॥ स्वर्गभावनैवा
नेनप्रकारेणोपदिष्टाभवतितदयमर्थः॥ यःस्वर्गंप्राप्तुमिच्छतिसयागेनयजेतयदिलक्षितंस्व
र्गंभावनयाभिलक्षितइतिस्वर्गंभावयेद्यागेनेयुक्तवति॥ तथास्वर्गशब्दःसुखेदनवनितादि
द्रव्यवाचीसुरवाचीचेतिन॥ तत्रपूर्वेपक्षः॥ अत्रयजेतजुहुयादित्यनेनाख्यातेनभावनाभिधी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्नोऽस्यांचभावार्थएवभाव्यःएवंपदेपात्तत्वात्स्वर्गस्तुपदांतरेणात्तत्वात्क्रियेनभाव्यतयान्वे
तव्यः॥नावयंचश्रुतेर्दुर्बलं॥स्वर्गस्यचभाव्यत्वाभावेसतिगुणत्वमंगीकार्यंस्वर्गश्चावश्या
त्रसुखसाधनचंदनादिद्रव्यवाची।चंदनंस्वर्गोद्विरेफगर्भाःस्त्रियःस्वर्गइतिकोशात्तासु
क्षणिकासंभिस्वर्गइतिचैतेव्यवहारदर्शनात्॥सचैतत्राद्धार्थेनस्येनप्रामाण्यात्॥
तथकर्मणितुयोग्यतेनविनायागनिष्पत्तेः॥द्रव्यंचभ्रुतेसिद्धं॥कर्मसुभाव्यंसाध्यं॥क
तस्यचभव्यार्थतायुक्तादृष्टार्थत्वात्॥ननुभाव्यस्यभूतार्थता॥दृष्टोपकाराभावान्नातस्मा
दपियागहोमादिशब्दोभावार्थएवभाव्यः॥अथवास्वर्गादिकामनैवयागांगमियस्मिन्नपिपक्षे
तथैव॥नचयागेनकिमपिफलंसाध्यतयुक्तं॥तस्मादफलसेवकर्मोक्तिः॥निःफलेषुचते
षुलोभाभावेदुर्वितव्यर्थासंसाध्यलाघनकश्चिल्लभतेतेति नकस्यापिकर्मजन्यफलंभो
क्तृत्वापरपर्योयोपिकारःसिध्यतीतिप्रासंगिकमाह॥फलयुक्तानिकर्माणि॥फलंपुरुषाभीष्टं
स्वर्गश्चनपुत्रादिकंकर्मोक्तयागादीनिफलयुक्तानिफलेःसंबद्धानिफलवंतीफलस्यसा ५॥
धकानिभवंतीत्यर्थः॥अथातोऽर्थं॥यज्ञेतजुहुयादित्यत्रप्रयोगस्यकेवलमाख्यातरूपत्वमेने
॥भाष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिनमंतव्यं किंतुक्लिश्र्यतेनविधिरूपत्वमप्यस्तिनत्वात्मानंप्रेरयेत्कारणभावनामाचष्टेविधि
रात्मकारणपुरुषप्रवर्त्तयति।पुरुषश्चस्वामिमंत्रप्रयोजनेनप्रवर्त्ततइतिनदृष्टंस्वर्ग
मेवभाव्यतयाविधिरुपादत्ते।।स्वर्गशब्दश्चसर्वोत्कृष्टेसुखेरूढस्तथाहियन्नदुखेनस
न्निकर्षनयनस्तमनंतरंयत्रप्राप्नोपतीतंसुरंस्वर्गपदास्पदमितिगाढ्येसुलक्षणि
कः।।तस्मात्स्वर्गस्यभाव्यत्वंविधिश्रुत्यासिद्धं।।यत्वर्थस्यतुभाव्यत्वमेकेनपदेनप्रति
पादमानमपिनप्रत्ययेनाभिधीयते।किंनुप्रत्ययात्तथासत्तिस्तस्यभाव्यत्वंभावनायाःप्रया
सन्नं।।एवंनैवंविधिरूपेणात्मानंप्रत्ययेनाभिधानात्।।किमयोगादपिस्वर्गस्येवभाव्यत्वं।।
यागहोमादिस्तुतस्यसाधनं।।तथाहिंस्वर्गकामोयागायोपदिश्यते।।यथालोहितोष्णीषाः
प्रचरंतीतिगायदियागस्वर्गकामायायथामलिनःस्नायात्।।बुभुक्षितोश्रीयादिनाव
त्रयीदंस्वर्गकामःकर्मणेउपदिश्यतेउपदिष्टोपिनप्रवर्त्तने।।केहिपरार्थंप्रयासमात्मिछेत।।
तथाचकर्मचोदनाअर्थीवैवभवंतिअथयागःस्वर्गकामार्थः।।ततोसोपुरुषस्यात्मनेपि
तिगतंपुरुषःस्वार्थंनकरोतीतितथाचकर्मचोदनार्थावतीभवंतिअन्यथावाक्यभेदोवैगु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥७ स्योपकारकः॥स्वर्गकामस्यानेकउपकारःपुत्रपशुगामाभा[illegible]
दीनामयतमंकरोतितत्तःस्वर्गश्रवणमात्रेणार्थः॥पुरुषमात्रवचनोभवति॥तथा
क्यमेवअंतरेणापिहिनदूचनेपुरुषमात्रमाख्यातादेवगम्यते॥तस्मा द्यागात्स्वर्गोभवतीति
निश्चीयते॥अनश्चस्वर्गकामोयजेतेत्यनेनकुर्योदित्यनयार्थः॥अत्रस्वर्गप्राप्तेयमानस्या
नुष्ठानमनूद्ययागस्तस्योपायत्वेनविधीयते॥अतःस्वतःस्वर्गादेर्यागादेःफलमिति
सिद्धंफलवंतेकर्मणीतिच॥अतःकर्मणांफलवत्वात्कर्मजन्यफलभोक्तृत्वापरपर्यायोपि
त्रातेपिपुरुषस्याग्निहोत्रादिकर्मसुसिध्यति॥अधिकारोवक्ष्यतेतत्रप्रतिज्ञानंभस्त्रेषामि
त्येषायामात्र॥सर्वेषामविशेषात्॥सर्वेषांकर्मानुष्ठानसमर्थानामसमर्थानांचांध
सकूपंगुबधिरदेवक्षत्तिरश्चांकर्मस्वधिकारोभवति॥कुतःअविशेषात्॥फलार्थित्वस्य
सर्वेषामविशिष्टत्वात्॥फलंहिसर्वैरिष्यतएव॥नत्रांचेतनानांदृष्टादीनांकामनाभाव
दस्त्वनधिकारः॥तिरश्चांनुभवति॥तिर्यंचोहिनापोपनयाश्रायांव्रजंति॥गीतपीडि
ताश्चातपं॥ननुतिर्यंचःप्रसासन्नमेवजानंति॥नतुकालांतरभाविफलं॥वैदिकानिच
कर्माणिकालांतरफलान्येव॥अतःकथंतिरश्चांतत्रप्रवृत्तिः॥उच्यते॥कालांतरेपिफ्र ॥४॥७

॥जाष्ठ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुक्रामयमानादृश्यंते ॥ श्वानश्चतुर्दश्यामुपवसंति ॥ श्येनाश्चाष्टमीमिति ॥ लिंगान्यपि चैवं दर्शयंति ॥
देवाहवै सत्रमासत सर्पाः सत्रमासत ॥ वनस्पतय सत्रमासत ॥ गावोवाएतत्सत्रमासतेत्यादी
नि ॥ तानिचदेवानांसर्पाणांवनस्पतीनांगवांचाधिकारंदर्शयंति ॥ नन्वेतैंधारयोयथोक्तंकर्म
कर्तुंनशक्यंनीतिकथमधिकारएषांउच्यते ॥ यज्ञेनेत्यादिमंत्रवाक्येनस्वर्गेधिकारकर्मो
पगतं ॥ तदनुसारिणिचोपवाक्यानिनतेकेचसमर्थानि ॥ अतश्चरुष्मंतं ॥ प्रसाज्या
वेक्षणविधिः ॥ अन्यथातुनहिध्याभावात्तद्रहितमेवफलसाधनं ॥ एवंवेदिरस्यवाचनरहि
तंस्रुक्स्थमंत्रोच्चारणरहितं ॥ एंगोश्वविष्णुक्रमणरहितमितिसर्वेषामर्थीमंत्राक्यांगरहित
कर्मानुष्ठानाहिद्रव्याधिकारनिरूपकः ॥ सिद्धांतमाह ॥ मनुष्याणांवारंभसामर्थ्यात् ॥ वा
शब्दः पक्षव्यावृत्तौ ॥ नसर्वेषामधिकारःकिंतुमनुष्याणामेव ॥ कुतः आरंभसामर्थ्यात् ॥
मनुष्याएवहियथाश्रुतंकर्मारब्धुंकर्तुंसमर्थाः ॥ नदेवऋषितिर्यगादयः ॥ तत्रदेवानां
देवनोनरा भारत ॥ अनधिकारः ॥ नह्यात्मानमुद्दिश्ययागः सं भवति ॥ किंचदेवा आप्तास्त
र्पादिकामाः ॥ नचतेषांकिंचिदवाप्तव्यमस्तियदर्थंकर्माणिकुर्वीरन् ॥ अमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६।। नधिकारः।।नहि भग्नादयोभग्नादिसर्गोत्पादयंति।।नेत्रस्तेनुविरोधः।।अनादृत्य

सत्रानो।।तेनभगोरपिस्वंपूर्वंभग्वंनरसंभवात्तेनः एवंमद्योनमेवेतिसेभवत्येव भगो भो

गिवत्वमिस्यस्येव ऋषीणामप्यधिकारः।।तथायेषांब्रह्मादेवतानेषामिरमयुनं।।येदेवा

नोदेवलोकाभावादनधिकारइति।।शक्यतेहीदेहापीडशब्दोच्चारणेनरविरहंतुं।।तेषा

देवानामप्यधिकारइति।।नचयूनिरंगरादिनामधिकारः।।मथोमात्रेपिसामर्थ्योभावात्।।आस

नचेत्तनसातैं।।तेघासनमेस्वेनयेतेनपारलौकिकंफलमिति।।ननूक्तंनश्रुतेरस्यमुपवासदर्श

नात्।।सेनस्यचाश्रम्यामुपवासदर्शनाश्रुतेपिपारलौकिकंजानंतीति।।तस्थमरगम्यनेरते

धर्मार्थमुपवसंतीति।।येहिवेदस्मृतिपुराणादिकंपठंति।।तएवंजानंतियदनेनकर्मणाइद

फलममुत्रप्राप्यतइति।।नचैनेवेदादिकंपठंति।।नाप्यन्येभ्यआगमयंतिनेननशास्त्रार्थमवि

ज्ञायःफलमामुष्मिकमनुशास्ति।।कथंतत्साधनंकर्मेकुर्युः।।तस्मान्नधर्मार्थमुपवसंतीति।

किमर्थंनश्रुतेषामुपवासः।।उच्यते।।रोगादरश्चिरेषा।।तर्हिनित्यकालेचूर्थंरोगः।।उच्यते।।नि ।।५।।

यतस्तत्रापिरोगाभवंतिायथात्तीयवत्चातुर्थिकादिजोगः।।अथतत्रश्रेते।।तस्माद्भगवा दी

नक्षाद्य।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांतिरश्चामधिकारः॥यानिपुनर्लिंगानिदेवादेःसत्रमासतेत्यादीनिअर्थवादस्तेविधिप्रेषश्च
नार्थाः॥यूथंप्रसाक्तानिरोधोयानिहस्तस्याअपिदेवा आसतेआसनचेतनास्तिर्यंचोपिअचे
तनावनस्पतयोपि॥किंपुनर्मनुष्याःयथाश्रुतमनुष्ठानेसमर्थाइति॥नस्माद्यथाश्रुतकरण
सामर्थ्यान्मनुष्याणामेवाधिकारोनगवादीनामितिसिद्धं॥एवमपिसर्वमनुष्याणामधि
कारेप्राप्तआह॥अंगहीनाश्रोत्रियषंढशूद्रवर्जं॥नन्वंगहीनाश्रोत्रियषंढशूद्रान्च
जीविकामनुष्याणामधिकारःकर्मसुभवतिमनुष्याअपिचेअंगहीनाअंगेनचक्षुरादि
नाहीनाअंधपंगूत्रबधिराद्यअश्रोत्रियाअनधीतवेदाःषंढानपुंसकाःशूद्राश्चनैते
षामधिकारस्यर्थः॥आरंभसामर्थ्यादित्यत्रापिनुनर्त्तते॥नचैतेंगहीनादयोयथाश्रुतकर्मा
रब्धंकर्तुंशक्नुवंति॥तद्यथा॥नह्यंधआज्यावेक्षणंकर्तुंशक्नोतिमूकोमंत्रोच्चारणं॥पंगु
श्चविहरणं॥बधिरश्चप्रेषश्रवणं॥अनधीतवेदश्रोत्रियस्तुच्यते॥सचकिमपिमंत्र
साध्यंकर्मकर्तुंनशक्नोति॥षंढोनपुंसकः॥तस्याप्यनधीतवेदत्वादद्रव्यवादशुचित्वाच्चना
धिकारः॥शूद्रस्यचानधीतवेदत्वादनधिकारः॥आज्यावेक्षणादिस्मृतिश्चविनाकर्मैवोचिगु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥ न्यमवयेवा॥ननूक्तमङ्गाक्यांगरहितकर्मानुष्ठानाद्यधिकारोभवतीत्युक्तं॥अत्रोच्यते॥भवेदेवंय
दिआज्यमवेक्षेतदर्शादीन्यंगवाक्यानिस्युस्तेनैणपुरुषैः संबध्येरन्प्रधानवाक्यशेषत्वेनैषांत न२
दंगयुक्तेनप्रधानवाक्येननदंगयुक्तः॥ननुपुरुषैः संबध्यमानोऽसमर्थोन्यरिद्यज्यसमर्थोभवति
ज्ञायते॥नैनोयस्यक्रतुरेवविहितोनलाङ्गावेक्षणमेवाविहितमित्तिरस्यविहितमितिमंतव्यं॥
नचप्रधानवाक्यविरोधसर्वाधिकारोनिश्चयाद्विरोधाभावाद्धिसर्वाधिकारस्यादस्तिचेद्वि
रोधआरंभसामर्थ्येऽन्तःसमर्थानामेवाधिकारः॥यत्रप्रधानवाक्यविरोधोयावज्जीवंय
जेतेत्यादौतत्रयथाश्रुतिप्रयोगादप्यफलेभवति॥तद्विरोधेतुसवांगयुक्तकर्मानुष्ठाना
देवफलंभवतिननुआरंभसामर्थ्यादित्येनैतेवृगवादीनामिनांधादीनामप्यधिकाराभावसिद्धेः
किमर्थंपुनरंगहीनाद्विनैमित्युक्तं॥उच्यते॥नियमार्थंतेनैषामेवाधिनैकारोनान्यस्य
स्यचाधिकारोभवेत्॥नतारंभसामर्थ्याभावादनधिकारः॥अनोनिर्धनोपिरूपार्थं
धनमर्जनाशक्तोसंपाद्यक्रत्वर्थंजयेत्तेनेति॥एवमंधादिरपिपशोरधिक्रियतेनान्यथा ॥६॥
दिक्रस्फोटयितुंशक्नोतीतिनस्याप्यधिकारोभवेत्॥एवमनंगहीनस्यावस्थायामाहिता

॥भाष्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७॥ धावेति शूद्रस्येति तद्विषयुदाहरणमनुशूद्रस्येति सोमपयोब्रतस्थाने॥अङ्गीवद्वा शूद्रस्येति पक्षमेधे॥ननु श्रौतवेदलाभपर्यधिकारहेतुरुच्यते॥अनुपनीतस्यापि जन्मतो वेदस्यापि पत्नीवद्वृषिष्यतीति प्राप्ते आह॥ब्राह्मणराजन्यवैश्यानामेवाध्ययनश्रुतेः॥ ॥शूद्रस्य कर्तोनाधिकारहेतुः॥ब्राह्मणराजन्यवैश्यानामेवाधानश्रुतेः॥यतो ब्राह्मणादीनां त्रयाणामेवाधानं श्रूयते॥नशूद्रस्य तथादिवसंते ब्राह्मणाग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति॥ अतः शूद्रस्याग्न्याधानश्रवणाभावादनग्निः शूद्रः॥अतस्तस्याग्निसाध्ये कर्मण्यधिकाराभावः॥नन्वाहिताग्नेरग्नीन्त्रीतल्लब्धादानाय करिष्यति॥मैवं॥आदधीतेत्यस्यनेदाधीदो तुरेवफलेनभवितव्यं॥कर्मयोग्यताग्नीनांतस्मात्॥अतोयेनाहिताःअन्यस्यकर्मनस्पर्शयंतितेनाहितानामग्नीनामनुपादानमयुक्तं॥अतःशूद्रस्याधानाश्रावणात्तेदर्शपायसाध्यानामग्नीनामभावादग्निसाध्येकर्मण्यनधिकारः॥अथवाब्राह्मणराजन्यवैश्यानामेवोपनयनश्रुतेः॥शूद्रस्यानधिकारः॥तथादिवसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यंशरदि वैश्यमिति॥उपनयनंचाध्ययनार्थं॥अतोनुपनीतस्याध्ययनाभावादनधीत ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदमात्रमपि नारः शूद्रस्य ॥ ननु मा शूद्रमुपनयनेत् ॥ अनुपनीतोऽपि पठिष्यति मिवं ॥ शूद्रस्य
वेदाक्षरश्रवणेऽुच्चारणे धारणे च प्रायश्चित्तस्य दर्शनात् ॥ श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणं ॥
उच्चारणे जिह्वाच्छेदः ॥ धारणे चशरीरभेद इति ॥ तथा ॥ यद्यु वारण छाकाशं यच्छू द्रस्य समीपेना ध्येयमिति शूद्रसमीपेऽध्ययनं प्रतिषेधतिर ॥ ननु हि आधावेति शूद्रस्येदा
दीनां लिंगानां वागति ॥ उच्यते ॥ रथकारविषयाणि तानि रथकारस्य हि कर्मस्वधिकारवक्ष्य
ति ॥ रथकारस्याधानमिति ॥ स चशूद्रसंबंधाच्छूद्रः कथ्यते ॥ तस्यमौमीशूद्रेति ॥ अथ ब्राह्म ना ५
णोयजेत स्वर्गकामोयजेतेत्येवमादिषुदर्शनेचिं ब्राह्मणस्वर्गकामश्चपुरुषमेधाद
यजेयेत्यैषश्राद्धऽधिकृतः ॥ ऽनानियमः ॥ स्त्रियपुमांसवेति ॥ किंनानयोः ॥ पुंलिंगनि
र्देशात्पुरुषस्यैवाधिकारः ॥ नुनः ॥ अत्रलिंगस्याप्रदर्शनार्थत्वाविवक्षितत्वात् ॥ यथागदंस
माप्तीयत्र ॥ अनःपुरुषस्यैवाधिकारोनस्त्रियाः ॥ अदयित्वाचायतः स्त्रिनिर्द्धनाज
नःसाद्रव्यात्यागात्स नक्रमनर्तुं वथंत्राक्रोति ॥ द्रव्याभावात् ॥ द्रव्याभावश्चभार्यापुत्रप
स्यत्रयाचनाःस्मृताः ॥ यत्तेसमधिगच्छंतियस्यतेनस्यनद्रुनमितिस्मृतेः ॥ न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥ स्मासुरुषस्येवाधिकारइतिप्राप्तेऽउच्यतेस्त्रीचाविरोधात्॥॥स्त्रीचज्ञानिरोत्रादिवूर्म
स्थिकरिणीभवन्ति॥कुतः॥अविरोधात्॥॥यतःस्वर्गकामोब्राह्मणइत्येतत्सुस्त्रिगंश्रूय
माणमपिनविरोधकरं॥॥यतूदमुद्दिश्यमानस्यविरोधणं॥॥यःस्वर्गकामःसयजेत
येवंतेनविधिसंस्पृष्टोभावादविवक्षितं॥॥अतोनपुरुषस्याधिकारः॥॥किंनुस्त्रियाऽ
पिअथवाऽविरोधादितिस्वर्गकामस्याविरोधादित्यर्थः॥॥नतुनजैमिनेर्॥॥फलोसरा
विरोधादिति॥॥ननूक्तेनिर्हेतुलात्नाधिकारइतिगम्यं॥॥धनवतीहिस्मृतिस्तस्याऽपिकर्मनादि
नाद्रव्यार्जनसंभवात्॥॥पितृभ्रातृभर्तृदत्तसंनानाच्चापत्यार्जितस्योभयसाधारणा
च्च॥॥धर्मेचार्थेचकामेचनास्तिचरितव्या॥॥याणिग्नहाङ्गसदृत्वंकर्मसुनथाकर्मफलेषु
द्रव्यपरिग्रहेषुचेत्यादिस्मरणात्॥॥ननूक्तंयत्तेसमप्यिगच्छतीत्यादिकंतत्रोच्यते॥॥स्मृति
प्रामाण्यान्निर्हेतुनयाभवितव्यं॥॥श्रुतिविरोधात्कुलार्थिन्यायमेष्टं॥॥यदिस्मृतिमनुरुध्य
मानापरवत्रान्निर्हेतुनाचस्यात्॥॥यजेतेयुक्तासनीनयजेत॥॥नेंसमस्याश्रुतिर्वाध्येत॥॥न ॥ त्र॥
चैतच्छुक्तं॥॥तस्मात्कुलार्थिनीसतीस्मनोमप्रमाणीस्यदृश्यंपरिग्रहीयात्॥॥यजे ॥८॥
तचेत्ति॥॥अतःस्मर्यमाणमपिनिर्हेतुकमन्याय्यमेव॥॥श्रुतिविरोधात्॥॥अतोनिर्हेतुक

॥भाष्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिपादनेन चनंअस्वातंत्र्यपरंआरभ्येयं॥तस्मात्स्त्रियाअपिपुत्रार्थित्वाविशेषाद्॥नत्वा
धिकारोभवति॥दर्शनाच्च॥दृश्यतेचायमर्थोवेदेयत्सत्यपिकर्मस्वधिक्रियन्तइतिमेखल्या
यजमानंदीक्षयन्ति॥यौत्रिणपत्नीमित्तिलेहइतिपत्नीचगर्हपत्येतूष्णीमित्तिचत्रयोरू
पिदीक्षितेषुवाक्येषुपत्न्याअपिकर्मस्वधिकारदर्शनात्सत्यपिक्रियन्तइत्युत्॥अथ
वेदेपत्न्याअपिधनवत्तादर्शनाच्चपत्न्यप्यधिक्रियन्तेतंतथाहि॥नसदापत्नीसंयाजयंति
नसहीयंदीक्षितेत्योनसदाकर्तुःपरग्रहाद्गामैश्वर्यमवरुंधतइति॥एवंपत्न्याअपिकर्तृ
सिद्धं॥उदीचीयन्ते॥क्विंपत्नीएथग्यजते॥यजमानश्चएथकृदुतोभौसंहृत्ययजेयातांमि
ति॥क्विंप्राप्तंएथक्कृथगिति॥कुतःयजेतेत्याख्यातप्रयुक्तायाएदृश्यग
त्याभावेनविरुक्षायारयितुमशक्यत्वात्॥अतएवकर्तृसंबंधिनियजमानेनपत्न्याच
एथक्कृथग्यागःकर्तव्यइतिपूर्वपक्षः॥सिद्धांतस्तुनतथैकृथग्यागःकार्यः॥कुतः॥वैगुण्य
प्रसंगात्दर्शपूर्णमासादौआज्यस्यपत्न्यवेक्षणंचेत्युभयमाम्नातंस्यात्॥तत्रएथक्त्वयो
गेक्रियमाणेयजमानकर्तृकेयागेपत्न्यवेक्षणंलुप्येतपत्नीकर्तृकेचयोजमानावेक्षणं॥

यजमानवेक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।१५।। तस्मादर्थेनोत्पादसंहार्यपत्नीयजेयातां।।ननुएथगप्यियजमानःपुमानन्यथौदिवसपरिक्रयेण
ज्यावेक्षणार्थंपत्नीसंपादयिष्यतिस्त्रीचयजमानेनैवं।।स्वामिनःपरिक्रयेणासपत्नेयेन
हियाकश्चित्तस्त्रीपत्नींवाच्या।।यज्ञस्वामिनीहिसा।।पत्युर्नोयज्ञसंयोगइतिपाणिनिस्मर
णात्।।एवंयजमानशब्दमपियज्ञस्वामिन्येवस्मरन्ति।।तस्मात्संहत्यकर्तृत्वंमुख्ययोः।।नचय ह
जेतेयैकत्वंचिरंहृ।।अग्नीषोमीयेहवनेसत्रयथाव्यासतयोर्हवनात्वाहवनेक्यंतथादर्प
फ्योरेकमेवकर्तृसंहत्यंगीकारात्।।अनयोर्हिउद्धारकालएवद्रव्यसाधारण्यमुक्तं।।
धर्मेचार्थेचकामेचनास्तिचरित्तव्येसनेनऋतोयस्यागःसरतेरतरसंसृष्टयोरेवदर्पयोः।।
नहिसाधारणमेकेनत्यक्तुंशक्यते।।भिन्नयोरप्यिदर्पयोःसंसृष्टद्रव्ययोःपृथक्स्वैरीकर्तृ नं ८
मप्रभवतोरेकमेवस्यात्तंप्रयलक्षणकर्तृ।।ननुसत्रिवहकर्तृभेदनियुक्तमेवंनचनं।।
सत्रिणांहिपृथग्द्रव्यतयापृथगेवकर्तृशक्तिर्वोचनिकानेनकर्तृसिध्यर्थंतुकर्तृणां
नुसाहित्यंहनुसंहत्यैवकर्तृत्वमितिविशेषः।।ननुसाधारणमपिधनंविभज्यपृथग्यागे ।।१९।।
संभवति।।मैवं।।यत्तत्तयोर्विभागःप्रतिषिद्धोनभर्तासहविभजेरितिं।।तस्मान्नविभज्यया
गः।।अतोद्रव्यसाधारण्याद्धिभागप्रतिषेधोधर्मेचार्थेचकामेचनास्तिचरित्तव्येति

।।भाष्य०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वचनाद्यथाग्नयोगेप्रागुत्तंगुण्यापत्तेश्चस्वामिभ्यासकृच्चिताभ्यामपेक्षितस्याज्यस्यकर्मो
गलाघनष्टथकृत्तंलक्षितुसदैवनाएवंचयजमानविद्वत्तयैवपत्न्याअपिकार्यक्षिद्धेर्नावि
द्वत्तयानस्याअपिकारभंगः।।अतएवसत्रकारोनुचीर्णोफलाधिकारादितरासामिति
पत्न्याअपिफलंदर्शयति।।श्रुतिरपिदिक्ष्योनिरंतरमारभेतामितिं।।तथाचस्मृतिः।।
नास्तिस्त्रीणांपृथग्यज्ञोनव्रतनाप्युपोषणं।।शुश्रूषयतिभर्तारंतेनस्वर्गेमहीयतइति।।
एवंदपत्योःसहाधिकारेतुल्यफलेचसिद्धेदंचिंत्यते।।किंसर्वैयाजमानंपत्न्याअपि
कर्तव्योतुतयावदुक्तमाग्नीध्रेसचर्यादिकमितिं।।किप्राप्तं।।तस्याअपियाजमानत्वेन
तुल्यत्वात्सर्वैयाजमानंतयाअपिकर्तव्यमितिसेवंप्राप्तेब्रूमः।।अत्रजैमिनिसूत्रं।।तस्यायाव
दुक्तमाग्नीध्रेसचर्यमतुल्यत्वादितिं।।तस्यायावदुक्तस्यात्।।अतुल्यत्वात्।।यजमानस्तुपु
मान्विद्वांश्चापत्नीचस्त्रीवाविद्वांश्चातःवलधर्मेषुयानियजमानगृह्णातितत्तथा
यजमानोवेदबध्नातिपात्राण्यासादयतिभुक्त्वमन्वारभतेइत्यादीनितत्रयजमानस्यो
पलक्षणत्वेनविवक्षितं।।अतसत्रेपत्न्याःकर्तृत्वंएवमेवंज्यमवेक्ष्यनेश्वरस्यैनस्यैवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमवेक्षेत्तेपत्नीस्यादेषपत्न्याएवकर्तृत्वेनयजमानस्य॥उक्तादेवतेत्तोः॥यानिचकृत्वर्थानिमा
॥१५॥ मंत्रकाणितेष्वविद्यमानस्यात्तास्त्रीणामध्ययनप्रतिषेधात्समंत्रोच्चारणंकर्तुंनशक्यंतत॥
नचान्यथानुपपत्त्यानस्याध्ययनंकल्पयितुंशक्यतेसंपन्नविधेनपुंसातेषामनुष्ठानसि
द्धेः॥यद्धिकृत्स्नंतेदेवेनवेनचिकर्तव्यंतदत्तोनुपपत्तेःस्त्रीणांत्वातन्निषिद्धंस्यपत्न्याअध्यन
स्यपुनःप्रसवेनविधिस्मरणमस्ति॥तस्मात्तदपिपत्न्यानकर्तव्यं॥याश्चास्त्रियोयश्चब्रस्व
चर्यंतत्सुरुषंप्रतिगुणभूतंनतत्रान्यतरेणकृतेसिध्यतिअन्यतरस्यलोपोहीयेत॥नचत्त
त्रयजमानस्योपादेयत्वेनश्रवणं॥तस्मादिहापिविवक्षितंअतआहौब्रह्मचर्यमुभयोः॥
आहुतीःशब्देनात्रेसंस्कारोलक्ष्यते॥व्रतयतीनाधःशायनयावनाख्यंजनाभ्यंजनाद्यंगतेघृत
योर्भवति॥संस्कारेष्वपिपत्न्यावपनंनभवति॥कुतः॥अवपनविधौकेशश्मश्रूपनयनंतिस
माहारेहुंडुयं॥नत्रकेशश्मश्रूणांनिवर्तनेसतिशास्त्रेणवपनंनसंपद्यतिनचप
त्न्यास्तयोसास्तिश्मश्रुभावात्॥जटानेत्यानवपनमस्तीतिनत्रत्ये॥ब्रह्मचर्यंगृहाण
कामनालक्षणार्थं॥ब्रह्मचर्यस्यास्त्रीग्रहणेनैवलक्षितत्वात्॥कामाऽपिपत्न्याभवेत्ति ॥१
दभावेधिकारानुपपत्तेः॥येपिमंत्रकाःस्वर्थास्तेष्वपियजमानएवकर्तातिद्धोहुतंत्रहो
॥आठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ॥अतः सर्वैस्मंत्रकृन्मंत्रकृंच यजमानेयजमानेनैवकर्तव्यं॥आहवनीयविधिर्नवाजपावेक्ष
णा॥दिपत्न्याकर्तव्यं नान्यत्॥तदेवमंगलीनादिवर्जिता नां ब्राह्मणक्षत्रियवैश्यानां पत्न्या
सहिताना मग्निहोत्रादिकर्मस्वधिकारउक्तः॥अथरथकारस्याधिकारमाह॥रथ
कारस्यानेकाग्न्याधेयकर्मणि अधिकारोभवति॥वर्षासुरथकारआदधीतेति
श्रुतेः॥अत्रेदंसंदिह्यते॥किंत्रैवर्णिकानामन्यतमोरथकरणयोगाद्रथकारः॥आहो
स्विन्नियतंकिंचिज्जातंतरमिति॥निनावस्यां॥त्रैवर्णिकानामन्यतमएवेति॥कुतः॥सो
पिरथंकरोतीतियोगाद्रथकारइत्युच्यतेऽनस्यचत्रैवर्णिकत्वादाधानंप्राप्तमेवाऽकर्तुमा
त्रंविधेयंतथासत्येकार्थविधानाद्वयभेदानभवन्तिलाघवंचास्याज्जंतरंपक्षेऽनस्याधा
नंविधानव्यमनुसंबध्यतेतथासन्नियमोस्यादधीतरथकारआदधीतेयेवंवाक्यभेदं
स्यात्॥अपिचभूयस्त्वसमर्थत्वात्प्राप्तिषिद्धः॥तस्मात्त्रैवर्णिकानामन्यतमएवेतिसिद्धंतमा
ह॥निनैवेचाऽचोद्यार्थेवाराब्धस्यपूर्वपक्षनिरासार्थः॥तत्रत्रैवर्णिकोरथकारः॥तस्यशिल्पो
पजीवनस्यप्रतिषिद्धत्वात्॥किंनुनियतंदासेतरमेव॥तत्रकेचिदेवमाहुः॥वैश्यायांक्षत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१११॥ वादुस त्रो माहिष्यां शूद्रायां वैश्यादुस न्नो वरूथी ॥ तस्यां करणास्यादुस न्नो रथकारइति ॥
तदुक्तं स्मृतौ माहिष्यां नोपजायेते विद्यूद्रांगर्न्दपान् ॥ शूद्रायां वरूथी वै स्यादिति ॥ याज्ञवल्क्ये
पि ॥ वैश्याच्छूद्रोत्तराज न्यान्माहिष्यां नोसुतौ स्मृतौ ॥ वैश्यात्तु करणः शूद्रायां विनास्वेषु विधि
स्मृतः ॥ विनास्वित्यधिनापरिणीतासु ॥ तथा ॥ माहिष्यां करण्यां तु रथकार प्रजायते इति ॥
अतो रथकारशब्दएवंविधसंकरजोरूढः ॥ रूढिश्च योगाद्बली यसीति न्यायेन ॥ रथकरो या
नीतियोगं यथिला जात्यन्तरमेव रथकारशब्देनोच्यते ॥ तस्य दमाधानं कालविशेषविधी
येन ॥ विशेषविधानाभावाद्यमेऽपि न भवति ॥ अपरेत्वाहुः ॥ रथकारशब्देन त्रैसोध्यना न्व
णा ८ नांग्रहणं ॥ ऋत्वैवेत्यधानमंत्रवर्णोक्तं ॥ सौध्वन्वनाश्वऋभवः ॥ सौधन्वनाऋभवइति
समानाधिकरण्यनिर्देशात् ॥ तथाचाहमनुः ॥ वाय्यतुजायतेवैश्यान्सुधन्वाचार्यएवचाभा
रद्वश्चविजन्मानः मैत्रासल्लएवचेति ॥ अनोमन्तोऽयंसुधन्वाद्यास्त्रैसैन्धपुत्रास्त्रयोगणा
सौधन्वनानामरणमेवात्राधिकारः ॥ मैत्रस्तुयाज्ञवल्क्येनोक्तोनास्त्यधिकारः ॥ सत्यपि ॥१११॥
रथकारशब्दवाच्यत्वेमंत्रवर्णोक्तन्यायेन सौधन्वनानामेवाधिकारइति ॥ तथाचैते
मिनिः ॥ सौधन्वनास्तुहीनेमंत्रवर्णोक्तीर्थैः ॥ सौध्वन्वनानामजातिः हीनस्तुमिश्रेवर्णे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्योजासंतरं॥नचंतेशूद्रानवैश्यानक्षत्रियानब्राह्मणाश्चंतिनेषाम्मिद्माख्यानं॥कथंप्रसिद्धे
र्मंत्रवर्णाच्च॥मंत्रवर्णोहिभवति॥सौधन्वनाऋभवश्चंति॥ऋभुक्षणोवैनिरथकारस्याख्या
नमंत्रः॥तस्माद्सौधन्वनाश्चऋभवश्चरथकाराः॥अपिचंतेनेमिमभवोयथेतिचायि
नेमिंनमंतितेऋभवश्चुच्यंते॥रथकाराश्चनेमिंनमंति॥तस्मादत्रैवर्णिकानामशूद्राणा
मेतदाख्यानमित्तिराबरस्वामिनः॥ननुविद्याभावेनसौधन्वनानामसमर्थंतयानधिक्रि
यात्रैवर्णिकएवावयवमुख्यारथकारशब्देनकिमितिनगृह्येतसोपिहिरथकारोभव
ति॥तस्याख्यानंप्रासंगिकानूद्यऋभुमात्रविधानाल्लाघवंभवति॥जासंतरेतुविद्वेषो
विधानाद्वैरवंस्यादित्यंकायामुत्तरमाह॥नाभावादित्तिबाह्यः॥वाह्यऋषिरित्याह॥
ततत्रैवर्णिकोरथकारः॥कुतः॥अभावात्॥त्रैवर्णिकस्यरथकारस्याभावात्॥कथम
भावः॥योगिकोयंशब्दोरथंकरोतीतिरथकारइतिनेनयावत्कालंरथकरणसंबंधस्तावत्
कालंरथकारइत्युच्यतेनसर्वदा॥अतस्त्रैवर्णिकस्यरथकारस्याभावात्विधारहि
तस्यापिऋभुसौधन्वनसाधनापरपर्यायस्यजासंतरस्यरूढावगतस्यवचनादो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ धानेपिकारोभवति॥ अत्रपार्थसारथिमिश्राआहुः॥रथकारस्येवऋभुसौधन्वनस्य
लनाथपरनामधेयस्याधानांतरवर्षासुविधीयतेनचनान्॥नहिवचनस्यविंचिद्ब्रा
क्यमस्तिनेनतावद्दृढिबलेनयोगवाधितासौधन्वनामाधानेविहितेनतद्बलेनैव
यथारथंपित्तन्मात्रौपयिकंविधार्जनमपिविनोपनयनमाक्षिप्यतेस्वाध्यायविरि
ताध्ययनांगत्वादुपनयनस्यरथकारस्यतद्वाधानविधिनैवविधार्जनमाक्षिप्यतेनचा
स्याधानसंभवेपित्रर्थिकारःसंभवतीतिविधाभावान्॥आधानेपिस्तावन्मात्रोपलक्षी
॥१०॥ णत्वानवैतुष्पिकारंकल्पयितुमर्हति॥तेनरथकारस्यैवतस्याधानेविश्वजिदादिवत्कल्प
फलंनचास्याहवनीयाद्युत्पादकंकर्मअर्थवेनाग्निसंस्कारसामानात्॥किमितिपुनःसं
स्कारार्थत्वेनसंभवतित्रैवर्णिकारस्याधानवदेवमार्दीनास्त्रत्राणामपराधारत्वात्॥र
थकारस्याधानेपिकारोभवतितत्रश्रुतत्वादियुक्तेरथकारग्रहस्तुनासंतरएवरू
ढः॥अतोयोगिकार्यंवैवनाम्नि॥अतःप्रकारांतरेठाराद्यानंक्रियतेरथकारस्य ॥१२॥
किमाधानमात्रेपिकारइतिप्राप्तेआह॥नियतेचान्यरथकारस्यनियतंनिसंस्कर्मीग्नि

॥ब्राष्य॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोत्रस्त्रीपूर्णमासादिरभवति ।चकारात्काम्यैनैमित्तिकंचाकुतः ।आधानश्रवणात् ।आधा
नेहितस्यश्रुतौतच्चगार्हपत्याग्नौनाऽसादकं ।अनयश्चकर्मार्थमेवोत्पाद्यतेस्वतोऽपु
रुषार्थत्वात् ।अतः कर्मार्थंगृह्यसादकाधानविधादेवेदमवसीयतेपरस्यसर्वकर्मस्वधिका
रोभवतीति ।एवंप्राप्तेआह ।नाभावादितिवाक्यंरथकारस्यसर्वकर्मस्वधिकारो भव
तीतियदुक्तं ।तन्न ।कुतः ।अभावात् ।रथकारस्योपरितेनकर्मसुलिंगाभावादितिवाक्य
आर्षेआरभ्यतेरथकारस्यकर्मसुलिंगानिनसंति ।तैरनधिकारोतुआधानेश्रुतेक
र्मसुलिंगान्यसंति ।एवंहीतिब्राह्मणस्याऽऽगच्छाद्वेतिवैश्यस्यचराजन्यवंधोश्चेतिवातथा
पयोव्रतंब्राह्मणस्ययवागूराजन्यस्यामिक्षावैश्यस्येति ।एवमिदंरथकारस्येत्येवंसुत्रेपिक
र्मलिंगंनास्ति ।तेनास्योत्तरकर्मस्वनधिकारोवचनाच्चाधानमात्रंभवतीतिगम्यते ।एवं
प्राप्तेऽदमेवसूत्रंपुनःपठित्वापरिहारत्वेनव्याख्यायते ।लिंगाभावादनधिकारोरथकारस्य
कर्मस्वितियदुक्तंतन्न ।कुतः ।अभावात् ।लिंगाभावेयेलिंगाभावात् ।लिंगसद्भावादि
त्यर्थः ।कानिपुनस्तानिलिंगानियेरथकारस्यापिकर्मस्वधिकारोवसीयते ।उच्यते ।आधावेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५२॥ श्रद्दस्यअष्टीवद्भ्रुश्रद्दस्यमस्तुश्रद्दस्येति॥श्रद्धासंबंध्याद्यथकारोत्रश्रद्दशब्देनाभिधीय
तेतस्यहिमातामहीश्रद्देति॥चतुर्थवर्णस्यमुख्यश्रद्दस्यतुप्रतिषेधउक्तः॥श्रद्दवर्जु
मिति॥तेनैतानिगोणश्रद्दविषयाणीति॥रथकारस्याधानमात्रेधिकारएवेत्यनित्ये
लिंगात्तन्निबंधविषयाण्येवस्युः॥तस्माद्रथकारस्योत्तरकर्मस्वधिकारइतिसिद्धंभवतथाचो
तंयज्ञिवल्क्येनतिनिरुक्तोपिनाध्यायांविज्ञानेश्वरेण॥क्षत्रियचेन्नवैश्यायासुतादि
तोमाहिष्यःवैश्यायांछूद्रयामुत्पादितोरथकारोनाम
जायतेभवति॥तस्यचोपनयनादिसंस्कारंवचनान्नाध्यायोस्ति॥क्षत्रियवैश्यानुलो
मानंतरोत्पन्नोरथकारस्तस्याध्ययनेज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिषिद्धाः॥
रथस्तंत्रेणास्तुविद्याध्ययनवृत्तिताचेतिरथस्तंत्रंरथविद्येतिमंजर्यांव्याख्यानंतत्रतु
स्कारक्रियाश्चाप्रतिषिद्धारथस्तंत्रइत्येवंपाठः॥अतोयाज्ञवल्क्येनान्तरएवरथकारोत्रगृही
तंन्यायः॥तस्यचत्रयोवर्णानयज्ञानर्मस्वधिकारः॥तथासतिआपावेतिश्रद्दस्येत्यादीनि ॥५३॥
वैश्यवाक्यानिसार्थकानिभवंतिनामनूतब्राह्मणवैश्यजातसुधन्वनपुत्रसुधनुपर्यायो

॥नाथ०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रथकारेणागृह्यमाणेजेषांवैयर्थ्यमेवस्यात्॥नचतदिष्यते॥तस्मात्सवर्णेतरेणश्रुते॥श्रु
तिसमवेतत्वादिति॥निषादस्थपतिर्गवेधुकेधिकृतः॥॥निषादस्थपतिर्गवेधुकेचरावधि
कृतोधिकारीभवति॥एवंहिश्रूयते॥यस्यैतद्वःप्रजाग्रामयेदयंवास्तुपश्येदो इगावेधुकंचरंनिर्व
पेदितिएतापिषष्ठमन्त्रमश्रुते॥एतयानिषादस्थपतिंयजयेदिति॥निषादस्थपतिर्यजेतेत्यर्थः॥
तत्रायंसंदेहः॥किमयंषष्ठीसमासः॥निषादानांस्थपतिर्निषादस्थपतिरिति॥निषादश्चा
सौस्थपतिश्चनिषादस्थपतिरितिकर्मधारयोवा॥तत्रयदिषष्ठीसमासस्तदानिषादस्वा
यःस्थपतिस्तस्याधिकारइति॥तत्रत्रैवर्णिकस्यैवसमर्थत्वाद्धत्वाग्निमत्वाद्यौधिकू ॥ ७
रेयुज्यते॥अन्यजातीयस्यनिषादस्यावैधत्वेनानग्निमत्त्वेनचासमर्थत्वात्तस्मात्षष्ठी
समासएवायमितिएवंपक्षःसिद्धान्तस्तुकर्मधारयोयंनिषादश्चासौस्थपतिश्चेतिवाक्यः॥
षष्ठीसमासपक्षेनिषादयेदलक्षणाप्रसक्तेः॥नह्यत्रषष्ठीश्रूयतेयतः॥संबंधःप्रतीयेत॥अ
तोनिषादपदेनैवषष्ठ्यर्थोलक्षणीयः॥इतरस्मिंस्तुपक्षेद्वयोरपिपदयोर्मुख्यार्थत्वेनैवानल
क्षणात्तस्मान्निषादस्थपतिरत्राधिकारी॥श्रुतिबलादग्निमानपीतिसिद्धं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥ अपि चात्रनिषादद्रव्यदक्षिणाश्रयते॥कूटंदक्षिणाकाणो वागर्हं भरन्तिकूटंहिनिषादानां
मेवोपकारकंनार्योणांइन्तिपवावकीर्णिनोगर्हमेज्या॥ ॥योब्रह्मचारिसहस्त्रीयंगच्छतिलो
वकीर्णी॥तस्यावकीर्णिनः॥सवल्लितब्रह्मचर्यस्यगर्हमेज्यागर्हमेनेज्यायागोगर्हमे
ज्याप्रायश्चित्तार्थो॥ ॥भवन्तिनानाद्रोविकल्पार्थः॥तेनगर्ह्योमपिप्रायश्चित्तान्तरं॥आ
ज्यादुन्तिहूयरूपंविकल्पेनभवन्ति॥अथापरमाज्यादुन्तीर्जुहोतिकामावकीर्णीस्मीत्याहुः॥
शाखान्तरेऽभयस्यविकल्पेनश्रुतत्वात्॥अत्रैतद्धायतेऽग्निंस्थपतीष्टिरवकीर्णिपशु
श्चैनमुभयमाधानसंस्कृतेष्वाहवनीयादिषुभवतिनलौकिकइतिन्तेनप्रकृतिन्तआहवनी
यादिप्रासेराहवनीयादीनीवाधाननिष्पाद्यस्थपतेरवकीर्णिनश्चाधानाविध्यभावेपिइष्टि
पशुआधानेप्रयोजनः॥अतएतदर्थमेवाधानेनाहवनीयादीनुसंपादयतेष्वेतदुभयंकर्तव्यं
इतिप्रासेआहलौकिकेन॥ ॥एतौस्थपतीष्टवकीर्णिपशूलौकिकौभवतः॥कुतः॥
नह्यग्निष्विष्टिपशुआधानंप्रयोजयतः॥आभ्यांहितदेनगर्ह्यतेयदूर्ध्वंपूर्णमासाद्गर्ह्यभवन्ति॥ ॥१४॥
नचाधानंदर्शपूर्णमासाङ्गं॥स्वकालेहिपुरुषसंस्कारकत्वेनहिहितमिति॥अतोलौकि

॥भाष्य१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काग्नावेवैतावनुष्ठेयौ॥लौकिकमेवगार्हपत्यस्थानेस्थापयित्वातत्रआहवनीयादिस्थाने
षुविहृत्यस्थपतीष्टयवकीर्ठिपशूदर्शपूर्णमासपशुवत्कृत्वैतौ॥अत्रविशेषविधानार्थ
मारभ्यतेसौमेपशुपुरोडाशश्चपणः॥॥अत्रावदानहोमःकर्तव्यःनतुसप्तसूपालेषु॥अप्सुवदानहोमः॥॥अवदानानांहृदयजि
ह्वाकोडुदीनांहोमोपसुदरेषुभवन्तिनाग्नौ॥वचनात्॥अवदानग्रहणात्॥अन्यदा
घाराज्यभागहोमादिकमग्नावेवकार्यंपत्नीसंनाह्यावदानं॥॥गार्हपत्यपत्नीसंना
ह्यावदानेकार्यंवचनात्॥नतौहवेभ्योहृदयादिभ्यःपुनरप्यधिकारः॥अथाग्निप्रस्तावा
दाहवनीयाग्निषुनित्यंकर्मकर्तव्यमित्यपेक्षायामाह॥नैतानिनेषुसर्वेषुसर्वार्थ
त्वात्॥नित्यानिकाम्यतानातीविसारयोग्यागार्हपत्यादयः॥तेषुनैतानिनेष्वग्निषुसर्वेक
र्मश्रौतेस्मार्तेचकर्तव्यं॥श्रौतंचहविःश्रपणंसोमादिकं॥स्मार्तेचपक्षादिनिरूपणकप्रका
शादिकं॥कुतः॥सर्वार्थत्वात्॥यतोगार्हपत्यादयोवैतानिकाःसर्वार्थाः॥कुतः॥यद्धिद्रव्यमु
त्पत्तिकालेकर्मविदर्थंनासंयुक्तमुसज्यते॥तत्सर्वार्थंतावसीयते॥कुतः॥सामर्थ्यात्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५॥ समर्थाहिगार्हपत्यादयःसर्वेकर्मसाधयितुंआधानेनोसादितानामग्नेर्नांप्रयोजनापेक्षा
यासामर्थ्येनसर्वाग्निकार्यार्थतासिद्ध्यतेतस्मात्प्रोक्षणेस्मार्तेचयद्घसत्रेतंस्थलुतंच
पाकादिकंतत्सर्वंगार्हपत्यादिष्वेतानिवेषुन्वनीत्यादीनाञ्च॥ दृश्यतेचायमर्थोय
स्मार्त्तमपिहोमपाकादिकंवैतानिकेषुक्रियतइति॥दक्षिणाग्निप्रस्तरश्रूयतेमांसंतत्रन
पचेयुरितिअतएवप्रतिषेधात्प्राप्तिरनुमीयते॥प्रतिषेधस्यप्राप्तिपूर्वकत्वान्न॥नच
श्रौतोमांसपाकोदक्षिणाग्नौविहितोसिध्यत्येषःप्रतिषेधःस्यान्न॥यतःसाग्नित्रेनोवि
हितः॥अस्तितर्हिताप्रतिषिद्धःस्मार्त्तमांसपाकः॥तस्यायंप्रतिषेधोविज्ञायते॥तस्म
न्नपिदक्षिणाग्नेःकरणार्थमग्निमात्रमार्हेद्यः॥आहिताग्निस्तुयोहि दक्षि
णाग्नेःसमाहितः॥अनाहिताग्नेश्चौपासनेऽग्न्यभावेतथासवैतानाःशंखलिखितौ॥
स्रग्गंधमाल्यैरलंकृत्यब्राह्मणान्सघृतमन्नमनुज्ञाथदर्भैर्दक्षिणाग्निंपरिस्तीर्यजु
हुयादग्नयेकव्यवाहनायस्वाहेत्यादि॥वायुपुराणेपि॥आहूयदक्षिणाग्निंतुहोमार्थंवैप्रयत्न
तइति॥अतोस्माद्दर्शनात्स्मार्त्तमपिवैतानिकेषुकर्त्तव्यमित्युत्तरःपक्षः॥सिद्धान्तमाह॥ ॥५१॥

॥भाष्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नौपासनश्रुतेः॥यदुक्तंवैतानिकेष्वग्निषुश्रौतस्मार्तेचकर्तव्यमिति॥तेन॥कुतः॥
औपासनश्रुतेः॥यत्तआहिताग्नेरौपासनःश्रूयते॥पित्र्येचैअह्नारणौपासनं
निरस्यतीतिपरिस्मार्तेमपिवैतानिकेष्वेवन्नियेत॥नहआहिताग्नेःपित्र्येचौ
पासनदर्शनंस्यात्॥अस्तिचानस्मार्तान्यौपासनेकर्तव्यानीति॥तथाचस्म
तिः॥कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रसङ्गतः॥यदाकालाहुतेरापिश्रौतेवैतानिका
ग्निष्ठितिगतस्तिष्ठन्नाह्वानीयापस्तंबस्मरणात्स्वागृह्यापहितंगच्छागरुरश्वं
लोवर्त्ततेगतस्त्रिसावसथ्यं॥अनश्चयत्किंचिद्पसोर्द्धंकर्मणोन्तिपौर्णिकृतो
गोमादिकस्मार्त्तेतस्तंमावसथ्येग्नौलवतीतिगतथाचश्वादिहोमानात्मार्थपर्यर्थं
